## ४०. बेङ्गलूरुनगरे अनुभवः

द्वितीया बहुवचनम्

सुधीरः - अभिराम ! भवान् बेङ्गलूरुनगरं गत्वा किं किं दृष्टवान् ?

अभिरामः - अहम् पुस्तकापणं गतवान् । तत्र पुस्तकानि दृष्टवान्। कादम्बरीं क्रीतवान् । उपन्यासान् दृष्टवान् ।

सुधीरः - तत्र विश्वविद्यालये प्रबन्धकान् दृष्टवान् किम् ?

अभिरामः - विश्वविद्यालये न केवलं प्रबन्धकान्, अपितु बहून् शोधच्छात्रान् दृष्टवान् । अनेकान् लेखान् सङ्गृहीतवान् ।

सुधीरः - तत्र प्रसिद्धम् उद्यानं न गतवान् किम् ?

अभिरामः - मध्याह्ने वस्तुसंग्रहालयं गतवान् । तत्र अनेकानि वस्तूनि दृष्टवान् । पुरातनानि आयुधानि दृष्टवान् । मार्गदर्शकान् पृष्टवान् । सायम् उद्यानं गतवान् । तत्र वर्णरञ्जितानि पुष्पाणि दृष्टवान् । पुष्पैः शोभमानाः लताः दृष्टवान् । तृणैः निर्मितानि चित्राणि दृष्टवान् ।

सुधीरः - तर्हि बेङ्गलूरुनगरं द्रष्टुम् एकं दिनं न पर्याप्तम् । भवान् तत्र कति दिनानि अटितवान् ?

अभिरामः - दर्शनीयानि स्थानानि बहूनि सन्ति तत्र । किन्तु कार्यभारकारणतः अहं शीघ्रम् आगतवान् ।

सुधीरः - पुनः मिलामि, भवतः अनुभवान् वदतु ।